फलं भुङ्क्ष्व ।'' (ii) - (क) व्याकुलम् (iii) - (ख) यथा:

# झारखण्ड (JAC) 2015 (A) बोर्ड परीक्षा में पूछे गये प्रश्न एवं उनके आदर्श उत्तर

Time : 3 Hours ] निर्देश के लिए देखें 2016(A) प्रश्नोत्तर [ Full Marks : 100

## खण्ड-'क' : अपठितांश अवबोधनम् (15 अंका:)

प्र० 1. अधोलिखितम् अनुच्छेदद्वयं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशम् उत्तरत-( निम्नलिखित दोनों अनुच्छेदों को पढ़कर उस पर आधारित प्रश्नों का निर्देश के अनुसार उत्तर दें )

(अ) प्रथमः अनुच्छेदः-

को न जानाति बोपदेवस्य कथाम्। स बाल्यादेव मन्दमतिः छात्रः आसीत्। सः पठितांशं तत्कालं विस्मरति स्म। तेन सहपाठिनः अपि उपहासं कुर्वन्ति स्म। गुरुणा तिरस्कृतः इतस्ततः भ्रमन् सः मार्गे एकं कूपम् अपश्यत्। काश्चित् स्त्रियः तत्र जलेन घटानि पूरयन्ति स्म। मृदुघटेन शिलाखण्डे कृतं गर्तः दृष्ट्वा बोपदेवः विस्मितः जातः। यदि मृदुमृत्तिकायाः घटेन कठोरपाषाणे गर्तः संभवति चेत् पुनः पुनः अभ्यासेन अहं विद्वान् न भविष्यामि इति निश्चयं कृत्वा सः अध्ययनार्थं प्रतिनिवृतः सफलो जातश्च। अतः सत्यम् एव उक्तम्-निरन्तरं मनसा च कृतम् अभ्यासं कदापि विफलो न जायते। अभ्यासेन सर्वं सिद्ध्यते।

प्रश्नाः I. एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )- $2\times\frac{1}{2}=1$

(क) बोपदेवः कीदृशः छात्रः आसीत् ?

(ख) के तस्य उपहासं कुर्वन्ति स्म ?

II. पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दीजिए )-$2\times1=2$

(क) काः घटानि पूरयन्ति स्म ?

(ख) किं निश्चयं कृत्यं बोपदेवः प्रतिनिवृतः ?

III. यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दीजिए )- $4\times\frac{1}{2}=2$

(क) 'पठितुम्' इत्यर्थे कः पर्यायः गद्यांशे प्रयुक्तः ?

(ख) 'मन्दमतिः छात्रः' अनयोः पदयोः किं विशेष्यपदम् ?

(ग) 'घटेन' इति पदे का विभक्तिः प्रयुक्ता ?

(घ) 'भ्रमन्' इति पदे कः प्रत्ययः ?

(आ) द्वितीयः अनुच्छेदः-

गुरुः सर्वान् शिष्यान् आहूय उपादिशत्-प्रियच्छात्राः! यूयं ध्यानमानाः आदर्शाः नागरिकाः भवत। परिश्रमिणः जनाः नूनं लक्ष्यम् आप्नुवन्ति। दीनजनान् सेवमानः जनः पुण्यं लभते। गुणिनः जनाः सर्वत्र पूज्यन्ते। सत्यमेव नित्यं तिष्ठति लोके। धर्मो रक्षति रक्षितः। पर्यावरणस्य संरक्षणम् अस्माकं प्रधानं दायित्वम्। इतस्ततः भ्रमित्वा वृथा कालः न यापनीयः। सत्यमेव जयते नानृतम्। वृद्धोपसेविनः जना आयुर्विद्या यशोबलं च आप्नुवन्ति। अस्माभिः राष्ट्ररक्षार्थं जागरूकैः भवितव्यम्। भगवच्चरणेषु इदं निवेदनं करणीयम् यत् अस्माकं मनः शिवसंकल्पमस्तु। अस्माकं बुद्धिः सत्कार्येषु प्रवृता भवेत् इति।

प्रश्नाः (I) एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )- $2\times1=2$

(क) गुरुः कान् आहूय उपादिशत् ?

(ख) कीदृशः जनाः सर्वत्र पूज्यन्ते ?

(II) पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दें )- $2\times2=4$

(क) वृद्धोपसेविनः जनाः किं किं प्राप्नुवन्ति ?

(ख) भगवच्चरणेषु अस्माभिः किं निवेदनं करणीयम् ?

(III) यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दें )- $4\times\frac{1}{2}=2$

(क) 'लभते' इति पदे कः लकारः ?

(ख) 'अस्माभिः' इति पदे कः मूलः शब्दः प्रयुक्तः ?

(ग) 'सत्यमेव' इति पदस्य संधि-विच्छेदं कुरुत।

(घ) 'परिश्रमिणः जनाः नूनं लक्ष्यम् आप्नुवन्ति' इत्यस्मिन् वाक्ये किम् अव्ययपदम् ?

(IV) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2

(इस अनुच्छेद के लिए एक समुचित शीर्षक लिखिए)

## खण्ड-'ख' : रचनात्मकं कार्यम् (20 अंका:)

प्र० 2. पत्रलेखनम्- $10\times\frac{1}{2}=5$

अध्ययनोपेक्षावशात् कनिष्ठभ्रातरं प्रति लिखितमिदं पत्रं मञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत-

( अध्ययन की उपेक्षा करने वाले छोटे भाई के पास लिखे गए पत्र को मञ्जूषा से शब्दों को चुनकर पूरा करें )

| |
|---|
| मञ्जूषा : त्वया, सफलः, विश्रामः, अंकाः, त्वम्, विषयेषु, मनोजः आशास्महे, कालम्, सप्रेम। |

हजारीबागतः

प्रिय देवाशीषः

तिथिः 9 फरवरी, 2015

........(i)........ आशीर्वादाः।

अत्र कुशलं तत्रास्तु। पितृपादस्य पत्रम् अद्यैव प्राप्तम्। परीक्षायां त्वया ये ........(ii)........ प्राप्ताः तत् अधीत्य मनसि दुःखं जातम्। तव अंकाः सर्वेषु अपि ........(iii)........ न्यूनाः सन्ति इति चिन्तनीयम्। मन्ये ........(iv)........ नियमेन प्रवर्तसे। कालं च व्यर्थम् अतिवाहयसि। ........(v)........ सर्वं कार्यं समयेन कर्तव्यम्। पठनस्य समये पठनं खेलनस्य समये खेलनं विश्रामस्य समये ........(vi)........ कर्तव्यः।

व्यर्थकार्येषु ........(vii)........ न यापनीयम्। तदा उच्च अंकान् प्राप्य ........(viii)........ सफल भविष्यसि। ........(ix)........ त्वं नूनमेव प्रथमश्रेण्यां उत्तीर्णो भविष्यसि।

भवताग्रजः
........(x)........

प्र० 3. संवाद लेखनम्–
अधोलिखितं संवादं मञ्जूषायां प्रदत्तपंक्तिसहायतया पूरयित्वा पुनः लिखत (निम्नलिखित संवाद को मञ्जूषा में प्रदत्त पंक्तियों की सहायता से पूरा कर पुनः लिखें)– 5×1=5

मञ्जूषाः
(i) सः मम अनुजः अस्ति।
(ii) सः सप्तम वर्गे पठति।
(iii) मम भ्रातुः जन्म-दिवसः।
(iv) सः केन्द्रीय विद्यालये पठति।
(v) मम भ्रातुः नाम अनुरागः अस्ति।

श्वेता– ह्यः त्वं विद्यालयं कथं न आगता ?
सरिता– ........................(I)........................
श्वेता– सः कस्मिन् वर्गे पठति ?
सरिता– ........................(II)........................
श्वेता– सः तव अग्रजः अनुजः वा ?
सरिता– ........................(III)........................
श्वेता– तव भ्रातुः किं नाम अस्ति ?
सरिता– ........................(IV)........................
श्वेता– सः कस्मिन् विद्यालये पठति ?
सरिता– ........................(V)........................।

प्र० 4. चित्रवर्णनम्–मञ्जूषायां प्रदत्तशब्दसहायतया अधो अंकितस्य चित्रस्य वर्णनं संस्कृते पञ्चवाक्येषु कुरुत– 5×2=10
(मञ्जूषा में दिये गये शब्दों की सहायता से नीचे दिये गये चित्र का वर्णन पाँच संस्कृत वाक्यों में करें)

मंजूषा– बालकः, बालिका, चिमटा, क्रीडनके, मेलकम्, जनाः, वार्तालापं, प्रमोदन्ते, झुल्लिकाः, संकेतयानि, कुटीरम्, मुस्लिमसम्प्रदायः।



(केवलं प्रज्ञाचक्षुर्भ्यः)
(केवल नेत्रहीन छात्रों के लिए)

प्रश्नः 'देशभक्तिः' इति विषयमधिकृत्य मंजूषापदसहायता पंच वाक्यात्मकम् अनुच्छेदमेकं संस्कृते लिखत ('देशभक्तिः' इस विषय को लेकर मञ्जूषा के पदों की सहायता से पाँच वाक्यों में संस्कृत में एक अनुच्छेद लिखें) 5×2=10

मंजूषा : जननी, जन्मभूमिः, नागरिकानां, राष्ट्रभावनां, स्वर्गात्, राष्ट्रसंरक्षणम्, कर्तव्यम्, देशप्रेमः, सेवा, महती, गरीयसी, पुनीतम्।

## खण्ड-'ग' : अनुप्रयुक्त व्याकरणम् (30 अंकाः)

प्र० 5. अधोलिखितेषु वाक्येषु रेखांकितपदेषु संधिविच्छेदं संधिं वा विधाय प्रदत्तस्थाने उत्तराणि लिखत– 3×1=3
(निम्नलिखित वाक्यों में रेखांकित पदों में संधि विच्छेद अथवा संधि करके दिये गये स्थान में उत्तर लिखिए)
(क) द्वौ + एव राजसभायां गतवन्तौ।
(ख) कोऽर्थः मूर्खपुत्रेण ?
(ग) सत् + शास्त्रेण जनानां कल्याणं सम्भवम्।

प्र० 6. अधोलिखितेषु वाक्येषु रेखांकितपदेषु समासं विग्रहं वा कृत्वा प्रदत्तस्थाने उत्तराणि लिखत– 4×1=4
(निम्नलिखित वाक्यों में रेखांकित पदों का समास या विग्रह करके प्रदत्त स्थान में उत्तर लिखिए)
(क) सरसि राजा चासौ हंसः तरति।
(ख) कदापि असत्यं न वक्तव्यम्।
(ग) दुष्यन्तः अनुमृगम् तपोवने धावति।
(घ) गंगायाः तटे पाटलिपुत्रनामधेयं नगरम्।

प्र० 7. अधोलिखितम् अनुच्छेदं कोष्ठकेषु प्रदत्तानां प्रकृति-प्रत्ययानाम् संयोज्य पूरयत– 5×1=5
(अधोलिखित अनुच्छेद को कोष्ठकों में दिये गये प्रकृति-प्रत्ययों को जोड़कर पूरा करें)
अस्माभिः विद्यालयं समयेन ........................ (I) ........................ (गम् + तव्यत्)। ये छात्राः मार्गे ........................ (II) ........................ (क्रीड् + शतृ) समयं नाशयन्ति, ........................ (III) ........................ (गुण + इन्) जनाः तेषां ........................ (IV) ........................ (मूर्खः + तल्) दृष्ट्वा उपहसन्ति। ........................ (V) ........................ (आचार्य + टाप्) तेभ्यः क्रुध्यति।

प्र० 8. तालिकादत्त पदानि संयोज्य संस्कृते पञ्च सार्थकवाक्यानि रचयत–
(तालिका में दिये गये पदों को जोड़कर संस्कृत में पाँच सार्थक वाक्यों की रचना करें) 5×1=5

| | | | |
|---|---|---|---|
| | अधुना | कालं | भ्रमति |
| | कदा | पाटलिपुत्रात् | गमिष्यति |
| श्यामः | वृथा | पुस्तकालयं | खादति |
| | ह्यः | उद्याने | न यापयति |
| | श्वः | ओदनं | आगच्छत् |

प्र० 9. अधोलिखिते वार्तालापे रिक्तस्थानानि वाच्यानुसारं पूरयित्वा प्रदत्तस्थाने उत्तराणि लिखत–(निम्नलिखित वार्तालाप में रिक्त स्थानों को वाच्यानुसार पूरा कर प्रदत्त स्थान में उत्तर लिखें) : 3×1=3
गितिका – रंजने ! त्वं किं लिखसि ?
रंजना – अहं तु पर्यावरणविषये लेखं लिखामि।
गीतिका – त्वया सुन्दरः लेखाः ............(i) .................।
रंजना – धन्यवाद ! सम्प्रति ........(ii) ............ कुत्र गम्यते ?
गीतिका – विद्यालयम्। किं त्वया न ............(iii) ................. यत् अद्य तत्र वनोत्सवः अस्ति।
रंजना – आम् ! ज्ञातम्, मया अपि सः वनोत्सवः अवश्यमेव द्रष्टव्यः।

प्र०10. अधोलिखितेषु वाक्येषु रिक्तस्थानानां पूर्तिः अङ्कानां स्थाने संस्कृतपदेषु समयलेखनं कुरुत–(निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति अंकों के स्थान पर संस्कृत पदों में समय लेखन करें) : 4×1=4
(क) पूर्वाह्णे .................. (11.00) वादने मुख्यातिथेः आगमनम्।
(ख) अपराह्णे .................. (12.15) वादने सांस्कृतिक कार्यक्रमम्।
(ग) अपराह्णे .............. (2.45) वादने प्राचार्यस्य सन्देशः।
(घ) अपराह्णे .............. (3.30) वादने राष्ट्रगानान्तरम् अवकाशः।

प्र०11. अधोलिखित वाक्येषु अङ्कानां स्थाने संख्यावाचक विशेषणपदानि प्रयुज्य उत्तराणि लिखत– $4 \times \frac{1}{2} = 2$
(निम्नलिखित वाक्यों में अङ्कों के स्थान पर संख्यावाचक विशेषण पदों का प्रयोग कर उत्तर लिखें) :

(क) श्रीरामस्य ...................... (2) पुत्रौ आस्ताम्।
(ख) पृथिव्यां ...................... (3) रत्नानि सन्ति।
(ग) क्रीडाक्षेत्रे ................ (15) छात्राः क्रीडन्ति।
(घ) वाटिकायां ................ (10) पादपाः विलसन्ति।

**प्र012. अधोलिखितानां वाक्यानां रेखांकितपदानां संशोध्य पुनः लिखत–** $4\times1=4$

(निम्नलिखित वाक्यों के रेखांकित पदों को शुद्ध करके पुनः लिखें)

(क) <u>अयं</u> बालिका पुष्पाणि त्रोटयति।
(ख) मम चत्वारि <u>मित्राः</u> सन्ति।
(ग) <u>तस्य</u> मिष्टान्नम् अतीव रोचते।
(घ) <u>हिमालयेन</u> गंगा निस्सरति।

## खण्ड-'घ' : पठित अवबोधनम्
## (पठित अवबोधन) (35 अंकाः)

**प्र013. अधोलिखितं गद्यांशं, श्लोकं, नाट्यांशं च अधीत्य तदाधारितानाम् प्रश्नानाम् उत्तराणि यथानिर्देशम् उत्तरत्–**

(निम्नलिखित गद्यांश, श्लोक और नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर निर्देशानुसार दें)

**(अ) गद्यांशः–**अस्ति देउलाख्यो ग्रामः। तत्र राजसिंह नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रमपश्यत्। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद–"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चात् अन्यो द्वितीयः कश्चिल्लक्ष्यते।" इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

**प्रश्नाः (I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए)–** $2\times\frac{1}{2}=1$
(क) राजपुत्रस्य किं नाम आसीत्?
(ख) गहनकानने सा बुद्धिमती कम् अपश्यत्?

**(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए)–** $2\times1=2$
(क) बुद्धिमती कुत्र गच्छति स्म?
(ख) व्याघ्रः किं विचार्य पलायितः?

**(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दीजिए)–** $4\times\frac{1}{2}=2$
(क) 'चपेटया' इति पदे का विभक्तिः?
(ख) 'मत्वा' इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः?
(ग) 'वसति स्म' क्रियापदस्य कर्तृपदं किम्?
(घ) 'पितुर्गृहम्' इति पदस्य संधि-विच्छेदं कुरुत।

**(आ) श्लोकः–**

रात्रौ जानुर्दिवा भानुः कृशानुः संध्ययोर्द्वयोः।
इत्थं शीतं मया नीतं जानुभानुकृशानभिः॥

**प्रश्नाः (I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए)–** $2\times1=2$
(क) रात्रौ केन शीतं नीतम्?
(ख) भानुः कदा शीतम् अपहरति?

**(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर लिखें)–** 1
कैः प्रकारैः शीतं नीतम्?

**(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दें)–** $4\times\frac{1}{2}=2$
(क) 'मया' इति पदे कः मूलशब्दः?
(ख) 'नीतिः' इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः?
(ग) 'पावकः' इत्यर्थे किं पदं श्लोके प्रयुक्तम्?
(घ) 'कृशानुभिः' इति पदे का विभक्तिः?

**(इ) नाट्यांशः–**

चन्दनदासः– (कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम्। कीदृशः तृणानामग्निना सह विरोधः?

चाणक्यः– अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

चन्दनदासः– आर्य! अलीकमेतत्। केनाप्यनार्येण आर्यस्य निवेदितम्।

चाणक्यः– भो श्रेष्ठिन्! अलमाशंकया। भीताः पूर्वराजपुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशांतरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।

चन्दनदासः– एव नु इदम्। तस्मिन् समये आसीद् अस्मद्गृहे अमात्यराक्षसस्य गृहजन इति।

**प्रश्नाः (I) एकपदेन उत्तरत (एक पद में उत्तर दें)–** $2\times1=2$
(क) तृणानाम् केन सह विरोधः भवति?
(ख) कः अमात्यराक्षसस्य गृहजनं रक्षति?

**(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दें)–** 1
भीताः राजपुरुषाः कुत्र व्रजन्ति?

**(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दें)–** $4\times\frac{1}{2}=2$
(क) 'आसीत्' इत्यस्मिन् पदे कः लकारः?
(ख) 'अलम् आशंकया' इत्यत्र किम् अव्ययपदम्?
(ग) 'प्रच्छादनम्' इति पदे कः उपसर्गः प्रयुक्तः?
(घ) 'अद्यापि' इति पदस्य संधि-विच्छेदं कुरुत।

**प्र014. अधोलिखितयोः कथनयोः भावम् उपयुक्तपदैः पूरयत–**
(निम्नलिखित कथनों के भाव उपयुक्त पदों से पूरा करें) $3+3=6$

(क) करणीयं बहिरन्तर्जगति तु बहुशुद्धीकरणम्।
अस्य अभिप्रायः अस्ति यत् वायुमंडलं ............(i)......... च दूषितं कुत्सितवस्तुमिश्रितं भोज्यं ............(ii)............ सर्वत्र दृश्यते, अतः अस्माभिः अन्तःकरणं बाह्य जगत् च ............(iii)............ अनिवार्यमस्ति।

(ख) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
अस्य भावः अस्ति यत् यः ...............(i) ............... उद्यमः कदापि न करोति सः जीवने सदा ............(ii) ............... भवति, अतः अस्माभि ............(iii) ............... न करणीयम् इति।

**प्र015. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तराणि लिखत–** $1\frac{1}{2}+1\frac{1}{2}=3$

(निम्नलिखित दोनों श्लोकों के अन्वय पूरा कर उत्तर लिखिए)

(क) सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमयो तथा॥

**अन्वयः**–सम्पत्तौ च विपत्तौ च ...............(i)............... एकरूपता (भवति) (यथा) ...............(ii) ............... उदये रक्तः (भवति), तथा अस्तमये च ............(iii)............... (भवति)।

(ख) वयोबलशरीराणि देशकालाशनानि च।
समीक्ष्य कुर्याद् व्यायामन्यथा रोगमाप्नुयात्॥

**अन्वयः**–वय, बल, शरीराणि ...............(i) ............ च समीक्ष्य ...............(ii) ............ कुर्यात् अन्यथा ............(iii) ............ आप्नुयात्।

**प्र016. रेखांकितपदानि आधृत्य प्रश्न-निर्माणं कुरुत–** $4\times1=4$
(रेखांकित पदों के आधार पर प्रश्न निर्माण करें)
(i) <u>आत्महितैषिभिः</u> सर्वदा व्यायामः कर्तव्यः।
(ii) <u>तृणानाम्</u> अग्निना सह विरोधः भवति।
(iii) सा कन्या <u>अतिथिं</u> स्नानाय प्रेरितवती।
(iv) राजा <u>जिज्ञासायाः</u> समाधानाय मुनेः समीपम् अगच्छत्।

**प्र017. अधोलिखितानि वाक्यानि कथाक्रमानुसारं पुनः लिखत–** $8\times\frac{1}{2}=4$
(निम्नलिखित वाक्यों को कथाक्रम के अनुसार पुनः लिखें)
(i) सद्व्यवहारेण पुरुषस्य कोपो गलितः।
(ii) मुनिः यथासाध्यं तस्योपचारे प्रवृतः।
(iii) तत्र श्रमक्लान्तः पुरुषः आगतः।
(iv) कतिपयैरेव दिवसैरागन्तुको स्वस्थो जातः।
(v) राजा मुनेरुत्तरपद्धतया प्रमुदितः भूत्वा स्वनगरं गतः
(vi) कश्चित् राजा जिज्ञासायाः समाधानाय मुनेः पार्श्वमुपागच्छत्।
(vii) मुनि नं किमप्यवोचत् प्रत्यत् स्वकीयानि कार्याणि यथापूर्वमाचरत्।
(viii) राजा निराशो भूत्वा प्रत्यावर्तनस्य विचारं चकार।

**प्र018. प्रसंगानुसारं रेखांकितपदानां शुद्धम् अर्थं विचित्य लिखत–** 3
(प्रसंगानुसार रेखांकित पदों का शुद्ध अर्थ चुनकर लिखें।)
(i) <u>दुर्वहम्</u> अत्र जीवितं जातम्।
(क) सुलभम् (ख) सुखदम् (ग) दुष्करम्
(ii) पिपासितो वा म्रियते याचते वा <u>पुरन्दरम्</u>।
(क) कृष्णम् (ख) इन्द्रम् (ग) वरुणम्।
(iii) सा गहन <u>कानने</u> एकं व्याघ्रम् अपश्यत्।
(क) वने (ख) पर्वते (ग) कन्दरायाम्।

## उत्तर

### खण्ड-'क' : अपठितांश अवबोधनम् (15 अंका:)

1. (अ) I. (क) मन्दमति: (ख) सहपाठिन:
II. (क) स्त्रिय: घटानि पूरयन्ति स्म ।
(ख) यदि मृदुमृत्तिकाया: घटेन कठोरपाषाणे गर्त: संभवति चेत् पुन: पुन: अभ्यासेन अहं विद्वान् न भविष्यामि इति निश्चयं कृत्वा बोपदेव: प्रतिनिवृत: ।
III. (क) अध्ययनार्थम् (ख) छात्र: (ग) तृतीया (घ) शतृ ।
(आ) (I) (क) शिष्यान् (ख) गुणिन: ।
(II) (क) वृद्धोपसेविन: जना:आयुर्विद्या यशोबलं च प्राप्नुवन्ति ।
(ख) भगवच्चरणेषु निवेदन करणीयम् यत् अस्माकं मन: शिवसंकल्पमस्तु ।
(III) (क) लट् (ख) अस्मद् (ग) सत्यम् + एव । (घ) नूनम् ।
(IV) आदर्श नागरिक ।

### खण्ड-'ख' : रचनात्मकं कार्यम् (20 अंका:)

2. (i) सप्रेम, (ii) अंका:, (iii) विषयेषु, (iv) सफल:, (v) त्वया (vi) विश्राम:, (vii) कालम्, (viii) त्वम्, (ix) आशास्महे, (x) मनोज: ।
3. (i) मम भ्रांतु: जन्म-दिवस: । (ii)स: सप्तम् वर्गे पठति ।
(iii) स: मम अनुज: अस्ति ।
(iv) मम भ्रातु: नाम अनुराग: अस्ति ।
(v) स: केन्द्रीय विद्यालये पठति ।
4. (i) इदं चित्रं ईदगाहमेलकस्य अस्ति ।
(ii) अत्र मुस्लिम सम्प्रायस्य जना: आगच्छन्ति ।
(iii) जना: वार्तालापं कुर्वन्ति ।
(iv) एकस्य बालकस्य हस्ते चिमटा अस्ति ।
(v) सर्वे प्रमोदन्ते ।

### खण्ड-'ग' : अनुप्रयुक्त व्याकरणम् (30 अंका:)

5. (क) द्वावेव । (ख) क: + अर्थ: / को + अर्थ: । (ग) सच्छास्त्रेण ।
6. (क) राजहंस: (ख) न सत्यम् । (ग) मृगस्य पश्चात् (घ) गंगातटे ।
7. (I) गन्तव्यम् (II) क्रीडन्त: (III) गुणिन:
(IV) मूर्खतां (V) आचार्या
8. (i) श्याम: अधुना ओदनं खादति ।
(ii) श्याम: कदा उद्याने भ्रमति ?
(iii) श्याम: वृथा कालं न यापयति ।
(iv) श्याम: ह्य: पाटलिपुत्रात् आगच्छत् ।
(v) श्याम: श्व: पुस्तकालयं गमिष्यति ।
9. (i) लेख्यन्ते, (ii) त्वया, (iii) ज्ञायते ।
10. (क) एकादश (ख) सपादद्वादश (ग) पादोनत्रि (घ) सार्धत्रि ।
11. (क) द्वौ (ख) त्रीणि (ग) पञ्चदश (घ) दश ।
12. (क) इयं (ख) मित्राणि (ग) तस्मै (घ) हिमालयात्

### खण्ड-'घ' : पठित अवबोधनम् (35 अंका:)

13. (अ) (I) (क) राजसिंह: (ख) व्याघ्रं ।
(II) (क) बुद्धिमती पितुर्गृहं गच्छतिस्म ।
(ख) इयं नारी व्याघ्रमारी अस्ति इति विचिन्त्य व्याघ्र: पलयित: ।
(III) (क) तृतीया (ख) क्त्वा (ग) राजपुत्र:, (घ) पितु: + गृहम् ।
(आ) (I) (क) जानुना, (ख) दीवायां / दिवसे ।
(II) जानुभानुकृशानुभि: शीतं नीतम् ।
(III) (क) अस्मद् (ख) क्त (ग) कृशानु (घ) तृतीया
(इ) (I) (क) अग्निना (ख) चन्दनदास: ।
(II) भीता: राजपुरुषा: देशान्तरं व्रजन्ति ।
(III) (क) लङ् (ख) अलम् (ग) प्र (घ) अद्य + अपि
14. (क) (i) जलम् (ii) समरणम् धरा (iii) रक्षणम्
(ख) (i) पुरुष: (ii) दु:खी (iii) आलस्यं
15. (क) (i) महताम् (ii) सविता (iii) रक्त:
(ख) (i) देशकालाशनानि (ii) व्यायामं (iii) रोगम् ।
16. (i) कै: (ii) केषाम् (iii) कम् (iv) कस्या:
17. (i) कश्चित् राजा जिज्ञासाया: समाधानाय मुने: पार्श्वमुपागच्छत् ।
(ii) मुनि नं किमप्यवोचत् प्रत्यत् स्वकीयानि कार्याणि यथापूर्वमाचरत् ।
(iii) राजा निराशो भूत्वा प्रत्यावर्तनस्य विचारं चकार ।
(iv) तत्र श्रमक्लान्त: पुरुष: आगत: ।
(v) मुनि: यथासाध्यं तस्योपचारे प्रवृत: ।
(vi) कतिपयैरेव दिवसैरागन्तुको स्वस्थो जात: ।
(vii) सद्व्यवहारेण पुरुषस्य कोपो गलित: ।
(viii) राजा मुनेरुत्तरपद्धतया प्रमुदित: भूत्वा स्वनगरं गत:
18. (i) - (ग) दुष्करम्
(ii) - (ख) इन्द्रम् (iii) - (क) वने ।